National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 108-112
© 2026 NJHSR
www.sanskritarticle.com

**कृष्णाचार्य पुरोहितः**
शोधच्छात्रः 22VVDV002,
द्वैतवेदान्तविभागस्य,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः,
(आं.प्र) 517507

**Correspondence:**
**कृष्णाचार्य पुरोहितः**
शोधच्छात्रः 22VVDV002,
द्वैतवेदान्तविभागस्य,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः,
(आं.प्र) 517507

# द्वैतदर्शने प्रामाणिकप्रतियोगिकत्वं मुनित्रयसम्मतम्

**कृष्णाचार्य पुरोहितः**

**शोधसारांशः**

प्रामाणिकप्रतियोगिकत्वविषये मुनित्रयाणां सम्मतिः वर्तते। द्वैतदर्शने मुनित्रयं नाम श्रीमन्मध्वाचार्याः, श्रीमज्जयतीर्थाः, श्रीव्यासराजतीर्थाः इति। श्रीमध्वाचार्याणां स्वीयप्रकरणग्रन्थे विष्णुतत्वनिर्णये तदभावस्य तत्ज्ञानपूर्वकत्वमिति वाक्ये प्रामाणिक-प्रतियोगिकत्वं दरीदृश्यते। एवमनुव्याख्याने भावाभावयोः एकत्र अवर्तमानत्वरूपविरोधः अस्तीति उच्यते। तादृशविरोधः प्रामाणिकत्वे सम्भवति। न तु अप्रामाणिकत्वे। एवं श्रीमज्जयतीर्थैरपि विष्णुतत्वनिर्णयग्रन्थस्य व्याख्यानसन्दर्भे च **अन्यत्र सत्वादेव** इति उक्तम्। तत्वप्रकाशिकायां च **जैवगुणविधुरे** इत्यत्र जीवगतगुणाभाववान् परमात्मा इति अस्ति। अत्र जीवगतगुणाभावः प्रामाणिकाभाव एव भवति। अन्यथा जीवेश्वरयोः भेदः न सिद्ध्येत्। एवं श्रीव्यासराजतीर्थैरपि मन्दारमञ्जर्यां भावाभावयोः सामानाधिकरण्यं विरुद्धमिति **उपपादितम्। अभावो हि प्रतियोगितावच्छेदकावच्छिन्नेन** विरुद्ध्यते इत्यनेन विरोधः कथ्यते। प्रतियोगिनः प्रामाणिकत्वे विरोधः घटते। अन्यथा नैव। तथा च एतेषां मुनित्रयाणां अभिप्रायः एक एव अस्तीति कारणात् प्रामाणिकप्रतियोगिकत्वं मुनित्रय-सम्मतमिति उच्यते।

**मुख्यशब्दाः**

प्रामाणिकप्रतियोगिकत्वं, अप्रामाणिकत्वं, मुनित्रयं, द्वैतदर्शनं, अत्यन्ताभावः, श्रीमन्मध्वाचार्याः, श्रीमज्जयतीर्थाः, श्रीव्यासराजतीर्थाः

**प्रस्तावना**

**श्रीमध्वः कल्पवृक्षश्च जयार्यःकामधुक् स्मृतः।**
**चिन्तामणिस्तु व्यासार्यः मुनित्रयमुदाहृतम्॥**

इत्युक्तरीत्या द्वैतदर्शनेऽपि मुनित्रयं वर्तते। तत्र द्वैतसिद्धान्तप्रतिष्ठापकैः श्रीमन्मध्वाचार्यैः कल्पवृक्षसदृशैः सूत्र-उपनिषत्-गीतेतिप्रस्थानत्रयेऽपि सप्तत्रिंशत्संख्याकाः सर्वमूलग्रन्थाः आरचिताः वर्तन्ते। अत एव द्वैतदर्शने मुनित्रयेषु द्वैतसिद्धान्तप्रवर्तकत्वेन आद्यं स्थानं सम्प्राप्तं वर्तते। सप्तत्रिंशत्ग्रन्थसंख्या तु **"[1]सप्तत्रिंशदमन्दधीः"** इत्यादि व्यासराज-प्रणीतग्रन्थमालिकास्तोत्रात् ज्ञायतेत्यविवादम्। प्रस्थानत्रयातिरिक्तेऽपि पुराणप्रस्थाने निर्णयग्रन्थाः तन्त्रशास्त्रे च संग्रहग्रन्थाश्च रचिताः वर्तन्ते।

द्वैतदर्शने मुनित्रयेषु द्वितीयं स्थानं कामधेनुसदृशानां टीकाकृत्पादेति अपरनामधेयानां जयतीर्थानामेव वर्तते। यतोहि श्रीमन्मध्वाचार्याणां सर्वेषां सर्वमूलग्रन्थानामुपरि व्याख्यानस्य करणात् एवं टीकामपि रचितत्वाच्च ते टीकाकृत्पादाः इति च प्रसिद्धाः। **"यस्य वाक्-कामधेनुर्नः कामितार्थान् प्रयच्छति"**।

इत्याद्युक्तरीत्या कामधुक्त्वात् कामधेनुसदृशाः विराजन्ते। श्रीमन्मध्वाचार्यकृतसमग्रसर्वमूलग्रन्थानां व्याख्यानव्याजेन श्रीमध्वा-चार्याणां हृदयाभिप्रायो आविष्कृत इति नास्त्यत्र संशयलेशोऽपि। अत एव द्वैतदर्शने मुनित्रयेषु द्वितीयमुनिस्थानापन्ना विराजन्ते।

द्वैतदर्शने तृतीयमुनिस्थानापन्नाः श्रीव्यासराजगुरुसार्वभौमाः। एते समग्रटीकाग्रन्थानां व्याख्यानेन, न्यायामृत-तर्कताण्डव-तात्पर्य-चन्द्रिकादिग्रन्थरचनेन च टीकागाम्भीर्यमर्म-प्रकाशनेन च द्वैतसिद्धान्तमूलग्रन्थानां टीकाग्रन्थानां च व्याख्याने सिद्धहस्ताः नैय्यायिका-दिमतनिरसने तर्ककर्कशविचारचातुरीधुरीणाः विराजन्ते। अत एव पक्षधरमिश्रेण महा-नुभावेन मिथिलादेशीयतार्किक-शिरोमणिना **"यदधीतं तदधीतं यदनधीतं तदप्यधीतम्। पक्षधरविपक्षो नावैक्षि विना नवीनव्यासेन"।** इति प्रशंसावचनमुक्तम्। एवमेव द्वैतदर्शनेऽपि श्रीव्यासराजगुरुसार्वभौमाणामनन्तरकालिका ज्ञानिवरेण्याः **"पदवाक्य-प्रमाणज्ञाः,सम्प्र-दायार्थकोविदाः दुर्वादि-फणिपक्षिकाः"** इति **"टीकागाम्भीर्यमाहात्म्यं व्यासतीर्थादयो क्षमाः** इति च। एवमेव **'यो व्यासमुनिदावाग्निः सच्छास्त्रमहता सह ददाह कुमतारण्यं'** इति **'नवकृत्वो न्यायसुधां'** इत्यादिरीत्या स्तोत्रं कुर्वन्ति। चतुषष्टिकलाकोविदाः शताधिक-ग्रन्थरत्नप्रणेताः कुम्भकोणे विराज-मानाः श्रीमद्विजयीन्द्रतीर्थश्रीमच्चरणाः श्री-व्यासराजगुरूणां विद्या-शिष्याः इत्युक्तौ किं? वक्तव्यमस्ति। तस्मात् कारणात् द्वैतदर्शने तृतीयमुनिस्थानापन्नाः विराजन्ते। इत्थं च व्याकरणशास्त्रे मुनित्रयं यथा वा प्रसिद्धं वर्तते। तद्वत् द्वैतदर्शनेऽपि श्रीमन्मध्वा-चार्याः, श्रीजयतीर्थाः, श्रीव्यासराजाः इति मुनित्रयं प्रसिद्ध-मित्यवधेयम्।

**प्रतिपाद्यविषयः**

**प्रामाणिकप्रतियोगिकत्वविषये श्रीमन्मध्वाचार्यसम्मतिः**

प्रकरणराजः श्रीमद्विष्णुतत्वनिर्णयः इति द्वैतदर्शने प्रथितं वर्तते। श्रीमध्वाचार्यैः विरचितेऽस्मिन् प्रकरणग्रन्थे प्रामाणिकप्रति-योगिकत्वमत्यन्ताभावस्य वर्तते इति अभिहितम्। तथाहि "[2]**तदभावस्य तज्ज्ञानपूर्वकत्वं चान्यत्र तस्य सत्वादेव दृष्टम्। तदनङ्गीकारे तदेव न युज्यते"** इति अस्योपरितनवाक्यस्यार्थस्तु एवं वर्तते। देशकालान्त-रस्थिताभावज्ञानं प्रति देशकालान्तरस्थित-प्रतियोगिज्ञानं कारणमिति कार्यकारणभावो ज्ञेयः। अन्यथा अर्थात् तद्देशकालयोरेव प्रतियोगिज्ञानाङ्गीकारे तदभावज्ञानं नोत्पद्यत इत्यर्थः। इतोऽपि विवरणमस्य वाक्यस्यैवमस्ति। तथाहि उदा- भूतले घटः वर्तते इति ज्ञानसत्वे तदा तत्रैव भूतले घटाभाव इति ज्ञानं न जायते। घटस्य प्रतियोगिनः प्रतिबन्धकत्वस्य सत्वात्। अतो देशान्तरस्थितप्रतियोगिज्ञानं अभावबुद्धिं प्रति कारणमिति ज्ञेयम्। एवं कालान्तरस्थितप्रतियोगिज्ञानं अभावबुद्धिं प्रति कारणमित्यपि ज्ञेयमित्यर्थः।

किञ्च अनेन प्रतियोगिनः प्रामाणिकत्वमपि वर्तते इति ज्ञायते। तथाहि- **"अन्यत्र च तस्य सत्वादेव दृष्टं"** इत्यादिपदैः देश-कालान्तरस्थिताभावप्रतीतिं प्रति अन्यत्र देश-कालान्तरस्थित-प्रामाणिक (तात्विक) प्रतियोगिज्ञानं कारणमित्यर्थोऽपि ज्ञायते एव। इत्थंच **'अन्यत्र सत्वादेव**=तात्विकत्वादेव (प्रामाणिकत्वादेव) अभावप्रत्ययो जायते इति स्पष्टतया ज्ञातुं शक्यते। तथा च श्रीमन्मध्वाचार्यैः मूलग्रन्थे एव प्रामाणिकप्रतियोगिकात्यन्ताभावः स्वीकृत इति ज्ञायते॥ तदेवोक्तं लघुप्रभायामैजी-आचार्यैः "[3]**तदभावस्य तज्ज्ञानपूर्वकत्वं चान्यत्र तस्य सत्वादेवेष्टम्" इति मूले प्रामाणिकप्रतियोगिकात्यन्ताभावस्याभिधाना-नुपपत्तेश्च"॥** इति अपि च एतादृशरीत्या अनङ्गीकारे **'तदेव न युज्यते'** इति (बाधकमपि) लोके अभावज्ञानमेव नोत्पद्यते इति बाधकमपि अभिहितमाचार्यपादैः। देशकालसम्बन्धित्वं सत्वं,एतद्देश-एतत्काले घटरूपप्रतियोगिनः प्रामाणिकस्य सत्वदशायां तद्देश-तत्काले घटाभावज्ञानं न जायते इति प्रामाणिकप्रतियोगिकत्वमत्यन्ताभावस्य वर्तते इति कण्ठत एवोक्तमाचार्यपादैरिति आद्यमुनिसम्मतत्व-मस्त्येवेति ज्ञातव्यम्॥

अपि चैवमेवाचार्यपादैः स्वीयानुव्याख्याने "[4]**भावाभावावुभौ तत्र कथं मिथ्या भविष्यतः"** इत्यत्रापि प्रामाणिकप्रतियोगिकत्वमुररी-कृतमस्ति। तथाहि- यो यस्याभावः यश्च यस्याभावस्य प्रतियोगी तावुभौ एकत्र एकदैव न मिथ्या इत्यर्थः। तात्पर्य्यार्थस्तु एवं वर्तते। प्रतियोगिसत्वे अभावो न भवति। कुतः ? तयोरेकत्रावर्तमान-त्वरूपविरोधस्य सत्वात्। एवमेव अभावसत्वे प्रतियोगी न भवति। विरुद्धयोः धर्मयोः मध्ये यत्र एकस्य मिथ्यात्वं तत्रापरस्य सत्यत्वमिति व्याप्तिः वर्तते। उभयोरपि मिथ्यात्वं नास्तीति मायावादिनं प्रति आचार्यपादानां विमर्शः।

एवमुभयोरपि मिथ्यात्वे व्याहतिरूपदोषोऽपि भवति। तथाहि— भावस्य निषेधे अभावोऽस्तीति अभावस्य विहितत्वं भवति।

पुनरभावस्य निषेधे भावस्य विहितत्वमिति व्याघातप्रसङ्गः। इत्थं च सत्वासत्वयोः,भावाभावयोः वा मध्ये एकत्रावर्तमानत्वरूपविरोधः वर्तते इति स्पष्टं ज्ञायते। तदपि प्रतियोगिनः प्रामाणिकत्वे सम्भवति। अन्यथा (अप्रामाणिकत्वे) विरोधवार्तैव नेति,व्याहतिरपि नास्तीति अनुव्याख्यानस्याशयः। एवमा-दिरीत्याचार्यपादैः ब्रह्मसूत्रभाष्ये च **'सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्' 'नानुमानमतच्छब्दात्' 'अरूपवदेवहि तत्प्रधानत्वात्'** इत्यादिब्रह्मसूत्रव्याख्यानकरणवेलायां प्रामाणिकप्रतियोगिक-त्वमत्यन्ताभावस्य वर्तते इति सूचितमस्ति। अतो मूलग्रन्थेषु तत्र तत्र प्रामाणिक-प्रतियोगिकत्वमस्तीति विषये आद्यमुनिसम्मतत्वमस्तीति अवधेयम्।

**प्रामाणिकप्रतियोगिकत्वविषये श्रीजयतीर्थसम्मतिः**

श्रीमज्जयतीर्थैरपि प्रामाणिकप्रतियोगिकत्वमत्यन्ताभावस्य अस्तीति उररीकृतम्। तथाहि—पूर्वोक्तरीत्या विष्णुतत्वनिर्णयग्रन्थस्य (मूलग्रन्थस्य) व्याख्यानकरणवेलायां "[5]**अन्यत्र देशान्तरे कालान्तरे च तस्य प्रतियोगिनः सत्वादेव"** इति व्याख्यातं वर्तते। अभावज्ञानं प्रति प्रतियोगिज्ञानं कारणमिति कार्यकारणभावं निरुच्य प्रतियोगिनः सत्वादेव=प्रामाणि-कत्वादेव (तात्विकत्वादेव) इति व्याख्यातत्वात् स्पष्टतया प्रामाणिकप्रतियोगिकत्व-मभावस्येति निरवकाशं प्रमाणं भवतीयं टीकेति एकं समाधानम्। अपरं च श्रीमन्न्यायसुधायां "[6]**स्वोपाधावनिषेधात् परोपाधौ निषेधात्"** इति प्रतियोगिनि देशे निषेधो (अभावो) नास्ति। प्रतियोग्यन्यत्र देशे अर्थात् परोपाधौ निषेधो (अभावो) वर्तते इति स्पष्टमभिधानात् ज्ञायते। प्रतियोगिनि देशे अभावो कुतो ? वा नास्तीति चेत् प्रतियोगिनः प्रामाणिकत्वात् प्रामाणिक-प्रतियोगिकत्ववति प्रदेशे तदभावज्ञानं न जायते। प्रतियोगिज्ञानस्य प्रतिबन्धकत्वात्। यदि प्रतियोगी अप्रामाणिकः तदा प्रतिबन्धकत्वाभावात् अभावज्ञानमुत्पद्यते। उदा- स्वोपाधौ= घटवति भूतले, घटाभावो नास्ति। परोपाधौ=घटातिरिक्तदेशे, निषेधात्=घटो नास्तीति प्रतिषेधादित्यर्थः। इत्थं च श्रीमन्न्यायसुधायां जयतीर्थैः प्रामाणिकप्रतियोगिकत्वमत्यन्ता-भावस्य वर्तते इति ज्ञातुं शक्यते। तदेवोक्तं लघुप्रभायामैजी-आचार्यैः "[7]**अन्यत्र देशान्तरे कालान्तरे च तस्य प्रतियोगिनः सत्वादेव" इति टीकायां, स्वोपाधावनिषेधात् परोपाधौ निषेधात्"** इति अभिहितम्।

तथाच श्रीमज्जयतीर्थैः **"वैलक्षण्यं सतश्चापि स्वयं सद्भेदवादिनः"** इत्यनुव्याख्यानस्य व्याख्यानकरणसन्दर्भे '[8]**मया हि एकस्यैव सदसत्वमङ्गीकृतम्'।** इत्यभिधाय स्वोपाधा-वनिषेधात् इत्यादिना ग्रन्थेन प्रतियोगिनः प्रामाणिकत्वे एव एतत्सर्वं पूर्वोक्तं घटते नान्यथेति अभावीयप्रतियोगित्वे प्रामाणिकत्वमस्तीति सम्मतिः प्रदर्शिता वर्तते।

एवमेव आनन्दमयाधिकरणस्थॐ[9]**भेदव्यपदेशाच्च**ॐ सूत्रव्याख्याने भाष्ये "[10]**अदृश्येनात्म्ये-निरुक्तेनिलयनेभयं प्रतिष्ठां विन्दते। अथ सोऽभयं गतो भवति"** इति तैत्तिरीयश्रुतिरुदाहृता वर्तते। अनया श्रुत्या जीवब्रह्मणोः भेदव्यपदेशः क्रियते इति सन्दर्भः। सन्दर्भे चास्मिन् जयतीर्थैः तत्वप्रकाशिकायां "[11]**अनात्म्ये स्वामिरहिते जैवगुणविधुरे वा"** इति व्याख्यानं कृतमस्ति। तत्र अनात्म्येत्यस्य प्रथमः अर्थः स्वामिरहिते इति। द्वितीयार्थः जैवगुण-विधुरेति। तत्र प्राथमिको स्वामित्वार्थस्तु आत्मैवात्म्यः स्वार्थे तद्धितः श्यङ्प्रत्ययः भवति। न विद्यते आत्म्यः स्वामी यस्य सः अनात्म्यः,तस्मिन् अनात्म्ये इति विग्रहः। स्वामिरहिते इत्यर्थः सम्पन्नः।

द्वितीयार्थः जैवगुणविधुरे इति। आत्मनः जीवस्य,इमे अनात्म्याः अर्थात् आत्मीयाः जीवसम्बन्धिनो गुणाः इत्यर्थः। न विद्यन्ते आत्म्याः यस्मिन् सः अनात्म्यः,तस्मिन् अनात्म्येत्यर्थः जैवगुणविधुरः इत्यर्थः। जीवगतगुणाभाववान् परमात्मेत्यर्थः। तदेवोक्तं तत्वप्रकाशिका-व्याख्याने भावरत्नकोशे श्रीसुमतीन्द्रतीर्थश्रीमच्चरणैः "[12]**यद्वा आत्मनो जीवस्येमे आत्म्याः आत्मीयाः जीवसम्बन्धिनो गुणाः। न विद्यन्ते आत्म्याः यस्मिन् तस्मिन् अनात्म्ये। जैवगुणविधुर इत्यर्थः।** इति प्रकृतमनुसरामः। जीवगतगुणाभाववान् परमात्मा इत्यत्र जीवगताल्पज्ञानाल्पसुखादिगुणानां प्रामाणिकत्वं जीवे वर्तते। तथाच जीवगता-ल्पज्ञानाल्पसुखादिप्रामाणिकगुणाभावः ईश्वरे अङ्गीकृतो वर्तते। ईश्वरे च अनन्तकल्याण-गुणपरिपूर्णत्वं वर्तते। अत एव जैवगुणविधुर इति तैत्तिरीयश्रुतिः वक्ति। प्रकृते जैवगतगुणानां अप्रामाणिकत्वे अप्रामाणिकतादृशगुणाभावो सर्वत्र वर्तते इति जीवेश्वरयोः भेदो न स्यात्। प्रामाणिकजैवगताल्पज्ञानाल्प-सुखादीनामभावो ईश्वरे सत्व एव तदा जीवेशयोर्भेदज्ञानं भवति नान्यथा। आनन्दमयाधिकरणस्थं भेदव्यपदेशाच्चेति सूत्रं जीवेश्वरयोः

भेदो वर्तते इति वक्तुमेव प्रवृत्तमस्ति। जीवेश्वरयोः भेदश्च जीवगतगुणानां प्रामाणिकत्वे एव सम्भवति। अन्यथा जैवगतगुणविधुरत्वं भगवति न सम्भवतीति श्रुतेः वैय्यर्थ्यं स्यात्। अतः श्रीमज्जयतीर्थैः स्वकीय तत्वप्रकाशिकायां प्रामाणिकप्रतियोगि-कत्वमङ्गीकृत्य **'अनात्म्ये जैवगुणविधुरे'** इति व्याख्यानं कृतमित्यतः मुनित्रयान्तर्गतानां जयतीर्थानामपि प्रामाणिकप्रतियोगित्वं सम्मतमेवेति ज्ञायते।

अत्र न केवला सम्मतिः जयतीर्थानामेव। अपितु मूलभूतादृश्येऽ-नात्म्येत्यादिश्रुतेः, तन्निर्णायकत्वेनाभिमतसूत्राणां, तद्व्याख्यान-भाष्यस्य च प्रामाणिकप्रतियोगिकत्वमस्तीति ज्ञातव्यम्। पूर्वाध्यायेषु प्रामाणि-काभावप्रतियोगिकत्वविषये श्रुति-स्मृति-ब्रह्मसूत्र-तट्टीका-टिप्पण्यादयः बहवः निरूपिता वर्तन्तेति नात्रपुनरुच्यते। एतत्सर्वमवगत्य लघुप्रभायामैजी-आचार्यैः संग्रहेण "[13]**अनात्म्ये जैवगुणविधुरे"ति तत्वप्रकाशिकायां"** इति उक्तमिति द्वैतदर्शने द्वितीयमुनि-स्थानापन्नानां श्रीमज्जयतीर्थानां सम्मतिः प्रदर्शिता वर्तते इति शम्॥

**प्रामाणिकप्रतियोगिकत्वविषये श्रीव्यासराजगुरुसार्वभौमाणां सम्मतिः**

मुनित्रयेषु मध्ये तृतीयमुनिस्थानापन्नाः श्रीमद्व्यासराजगुरुसार्व-भौमाः विराजन्ते। एतैरपि प्रामाणिकप्रतियोगिकत्वमत्यन्ताभावस्य वर्तते इति अङ्गीकृतमस्ति। उपाधिखण्डनमन्दारमञ्जर्यामत्यन्ता-भावस्य प्रतियोगिसामानाधिकरण्यमस्तीत्याशङ्क्य निरासकरण-सन्दर्भे एवं तत्र प्रतिपादितं दृश्यते। तथाहि— "[14]**ननु अत्यन्ताभावोऽपि प्रतियोगिसमानाधिकरणः अभावत्वात् प्रागभाववत् इति"** इत्यादिना अत्यन्ताभावस्य अनुमानेन प्रतियोगिसामाना-धिकरण्यमाशङ्क्य मैवमित्यादिना समाधान-मभिधीयते। तथाहि—सामान्यतः भावाभावयोः विरोधः वर्तते एव। तादृशविरोधपरिहारस्तु प्रकारद्वैविध्येन। कालभेदेन विरोधपरिहारः तथा देशभेदेन विरोधपरिहारश्चेति। प्रागभावः तथा प्रध्वंसाभावयोः कालभेदेन विरोधपरिहारः सम्भवति। घटोत्पत्तेः प्रागभावः घटोत्पत्यनन्तरं विनश्यति इति कृत्वा कालभेदेन विरोधपरिहारः। एवं घटप्रध्वंसः घटोत्पत्यनन्तरं जायते इति कृत्वा घटप्रध्वंसस्यापि कालभेदेन विरोधपरिहारो वक्तुं शक्यः। तस्मात् प्रागभावप्रध्वंसयोः विरोधपरिहारात् प्रतियोगिसामानाधिकरण्या-ङ्गीकारेऽपि न कश्चिद् विरोधः।

अत्यन्ताभावस्य तु नित्यत्वात् सर्वकालेषु वर्तते इति कृत्वा कालभेदेन विरोधपरिहारस्य असम्भवेन देशभेदेनैव विरोधः परिहरणीयः इति। तदुपरि एवं शङ्का—नित्योऽपि अन्योन्याभावः प्रतियोगिसमाना-धिकरणो दृश्यते। तथाहि—घटवत्यपि भूतले घटान्योन्या-भावानुभवात् इत्यतः कथं तयोः विरोधपरिहारः? इति चेत् इत्थम्— प्रतियोगितावच्छेदक-विशिष्टप्रतियोगिना साकमभावस्य विरोधः न पुनः प्रतियोगिमात्रेण। यदि प्रतियोगिमात्रेण अभावो विरुद्ध्यते इत्युच्यते तदा अदण्डिनि पुरुषे विद्यमान एव 'दण्डी पुरुषो न' इति निषेधो न स्यादिति। यतोहि — तत्र अदण्डिनि पुरुषे प्रतियोगि-तावच्छेदकदण्डावच्छिन्नस्य पुरुषस्य असत्वेऽपि प्रतियोगिमात्रस्य पुरुषस्य सत्वेन 'दण्डी पुरुषो न' इति निषेधः केवलपुरुषस्थले न स्यादिति दोषः।

इत्थं च अन्योन्याभावः यद्यपि प्रतियोगिमात्रसमानाधिकरणः तथापि पूर्वोक्तरीत्या प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसमानाधिकरणो न भवति। 'भूतले घटः भूतलात्मना नहि वर्तते'। तस्मात् सर्वत्र प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिनः साकमभावस्य विरोध इति वक्तव्यम्। तदेवोक्तं मन्दारमञ्जर्यां श्रीव्यासराजगुरुसार्वभौमैः— "[15]**अभावो हि प्रतियोगितावच्छेदकावच्छिन्नेन प्रतियोगिना विरुद्ध्यते न पुनः प्रतियोगिमात्रेण"** इति।

तथा च प्रकृते प्रतियोगिताच्छेदकविशिष्टप्रतियोगिनः सत्वे तदा अभावज्ञानं नोत्पद्यते। प्रतिबन्धकत्वात्। प्रतिबन्धकत्वं च कदा भवतीत्युक्तौ ? प्रतियोगिनः प्रामाणिकत्वे एव भवति। नान्यथा। तदपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिनः प्रामाणिकत्वे एव सम्भवति न पुनरप्रामाणिकत्वे। तदुक्तं उपाधिखण्डनटीकायां "[16]**तस्य विरुद्धत्वात्"** इति। भावाभावयोः सामानाधिकरण्यस्य विरुद्धत्वात् इत्यर्थः। एतत्सर्वं संगृह्य विष्णुतत्वनिर्णयलघुप्रभायां ऐजी-आचार्यैः उक्तम्— "[17]**अत्यन्ताभावस्य नित्यत्वात् काल-भेदेन विरोध-परिहारासम्भवेन देशभेदेनैव विरोधः परिहरणीयः' इति मन्दारमञ्जर्यां च प्रामाणिकप्रतियोगिकात्यन्ताभावस्याभिधाना-नुपपत्तेश्च। तस्मात् निषेधः प्रामाणिकप्रतियोगिक-तया मुनित्रयसम्मत इति ज्ञायते"** इति शम्॥

**निष्कर्षः**

अस्मिन् शोधपत्रे द्वैतवेदान्तदृष्ट्या प्रामाणिकप्रतियोगिकत्वविचारः कृतः। तत्र प्रामाणिकप्रतियोगिकत्वविषये मुनित्रयाणां सम्मतिः

वर्तते। श्रीमन्मध्वाचार्याः विष्णुतत्व-निर्णये **अन्यत्र तस्य सत्वादेव दृष्टम्** इत्यनेन वाक्येन प्रामाणिकप्रतियोगिकत्वं प्रदर्शयन्ति। एवमनुव्याख्यानेऽपि भावाभावावुभौ इत्यनेन भावाभावयोः मध्ये एकत्रावर्मानत्वरूपविरोधः वर्तते इति स्पष्टं ज्ञायते। तदपि प्रतियोगिनः प्रामाणिकत्वे सम्भवति। यदि अप्रामाणिकमिति उच्येत, तर्हि विरोध एव न घटते। इत्यपि प्रतिपादयन्ति। एवं श्रीमज्जयतीर्थाः सुधायाम् स्वोपाधावनिषेधात् इत्यनेन प्रतियोगिनि देशे निषेधो नास्ति। अन्यत्र देशे अस्तीति प्रतिपादयन्ति। प्रतियोगिनः प्रामाणिकत्वादेव प्रतियोगिनि देशे निषेधो न घटते। एवं तत्वप्रकाशिकायामपि **जैवगुणविधुरे** इत्यनेन जीवगतगुणाः प्रामाणिका इति कारणात् जीवगतप्रामाणिकगुणाभावः ईश्वरे अस्तीति उच्यते। एवं श्रीव्यासराजतीर्थैरपि मन्दारमञ्जर्यां भावाभावयोः सामानाधिकरण्यं विरुद्धमिति व्याख्यानसन्दर्भे **'अभावो हि प्रतियोगितावच्छेदकावच्छिन्नेन विरुद्ध्यते'** इति प्रोक्तम्। प्रतियोगिनः प्रामाणिकत्वे विरोधः उपपद्यते। अन्यथा विरोधः नैव सम्भवति। तथा च अत्यन्ताभावस्य प्रामाणिक-प्रतियोगिकत्वमस्तीत्यत्र एतेषां मुनित्रयाणां आशय एक एव अस्ति।

**अन्वेषितग्रन्थसूची**


I. **अनुव्याख्यानम् –** २०१५ सुधाविद्यार्थिनः। पूर्णप्रज्ञविद्यापीठम्। बेङ्गलूरु

II. **श्रीमन्न्यायसुधा-** १००३, श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्, श्री-राघवेन्द्रस्वामिमठः, मन्त्रालयः

III. **तत्वप्रकाशिका –** २०१२ (भावरत्नकोशः) डा.एल्.एस्. वादि-राजाचार्यः पूर्णप्रज्ञसंशोधनमन्दिरम्,पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु

IV. **भावरत्नकोशः-** २०१२ डा. एल्. एस्. वादिराजाचार्यः पूर्णप्रज्ञ-संशोधनमन्दिरम्, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु

V. **उपाधिखण्डनमन्दारमञ्जरी–** द्वितीयावृत्तिः२०१० डा. सत्यध्या-नाचार्यकट्टी, द्वैतवेदान्ताध्ययन संशोधनप्रतिष्ठानम्, बेङ्गलूरु-४

VI. **श्रीमद्विष्णुतत्वनिर्णयः-** १९६९ भण्डारकेरिमठाधीशश्रीश्रीविद्या-मान्यतीर्थनिर्देशानुसारेण श्रीमन्मध्वराद्धान्तसंवर्धिनीसभासम्पा-दकमण्डलेन सम्पादितः परिशोधितश्च, श्रीमन्माध्वराद्धान्त-संवर्धिनीसभा ३४-ए. गङ्गाधरेश्वरकोयिल् स्ट्रीट्, मद्रपुरी


**पादटिप्पणी**

[1]ग्रन्थमालिकास्तोत्रम्. श्लोक-२

[2]विष्णुतत्वनिर्णयः ६३२ पृ

[3]विष्णुतत्वनिर्णयलघुप्रभा ३४ पृ

[4]अनुव्याख्यानं ४-१-४३

[5]विष्णुतत्वनिर्णयटीका ६३३ पृ

[6]लघुप्रभायामुदाहृतन्यायसुधावाक्यं ३४ पृ

[7]विष्णुतत्वनिर्णयलघुप्रभा ३४ पृ

[8]न्यासुधायाः जिज्ञासाधिकरणं १३२१ पृ

[9]ब्रह्मसूत्रभाष्यं १-१-१७

[10]तैत्तिरीयश्रुतिः २-१६

[11]तत्वप्रकाशिका ३७२ पृ

[12]तत्वप्रकाशिकाभावरत्नकोशः ३७५ पृ

[13]विष्णुतत्वनिर्णयलघुप्रभा ३४ पृ

[14]उपाधिखंण्डनमन्दारमञ्जरी ७१ पृ

[15]उपाधिखण्डनमन्दारमञ्जरी ७१ पृ

[16]उपाधिखण्डनटीका ७१ पृ

[17]विष्णुतत्वनिर्णयलघुप्रभा ३४ पृ